**अवमानिन्** त्रि॰ अव+मन—णिनि स्त्रियां ङीप्। अवज्ञातरि २अनाद्रियमाणे च "धिङ्मामुपनतश्रेयोऽवमानिनम्" शकुन्तला। [२अनादरणीये च।

**अवमाननीय** त्रि॰ अव+चु॰—मन-अनीयर्। १अवज्ञेये

**अवमान्य** त्रि॰ अव+मन—ण्यत्। १अवज्ञेये २तिरस्कार्य्ये च "सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित्" मनुः अव+चु॰मन-ल्यप्। २अवज्ञायेत्यर्थे अव्य॰।

**अवमार्जन** न॰ अव+मृज-भावे ल्युट्। १प्रक्षालने करणे ल्युट्। २तत्साधने जलादौ "इमा ते वाजिन्नवमार्ज्जना नाम्" ऋ॰ १,१६२,५, "अवमार्ज्जनानि अङ्गप्रक्षालनसाधनान्युदकानि" भा॰।

**अवमूर्द्धन्** त्रि॰ अवनतो मूर्द्धाऽस्य। अवनतमस्तके।

**अवमूर्द्धशय** पु॰ अवमूर्द्धा सन् शेते शी-अच्। अधोमुखतया शायिनि मनुष्ये। "उत्तानशयादेवा अवमूर्द्धशया मनुष्याः" इत्युक्तेः गर्भादौ तथाशयनाद्वा नरस्य तथात्वम् २तथाभूततया शायिमात्रे त्रि॰। [उन्मोचने।

**अवमोचन** न॰ अव+मुच—भावे ल्युट्। बन्धनराहित्ये

**अवमोटन** न॰ अव+मुट्—णिच्—ल्युट्। (मोचड़ान) परिवर्त्तनेनान्यथापादनरूपे परिमोटने।

**अवयजन** न॰ अव+यज—गतौ करणे ल्युट्। अपगमसाधने "देवकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमस्यस्मत्कृतस्यैनसोऽवयजनमसि यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि यत् स्वपतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमस्यैनस एनसोऽवयजनमसि" ताण्ड्यब्रा॰ "अवयजनम् अपगमनसाधनम्" भा॰।

**अवयव** पु॰ अवयूयते कार्य्यद्रव्येण संबध्यते अव+यु—कर्मणि अप्। १द्रव्यारम्भके द्रव्ये "यथा परमाणुः द्व्यणुकं द्व्यणुकस्त्रसरेणुमारभते इत्यादिक्रमेण अन्त्यावयविपर्य्यन्तानि सर्व्वाणि द्रव्याणि स्वाश्रिततया अवयविद्रव्यान्तरमारभन्ते "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्" वै॰सू॰ उक्तेः। अन्त्यावयविविभुद्रव्याणि विहाय द्रव्याणां सजातीयद्रव्यान्तरारम्भकत्वं तदर्थः अन्त्यावयवी नित्यद्रव्यं च न कस्यचिदारम्भकम्। आरम्भकद्रव्ये च द्रव्यान्तरस्य समवायेनाऽवस्थित्याऽवयवत्वम्। आरम्भकद्रव्यञ्च उपादानकारणतया समवायिकारणतया च व्यवह्रियते अधिकमवयविशब्दे वक्ष्यते "अनित्या च तदन्या स्यात् सैवावयवयोगिनी" भाषा॰। अवच्छिन्नपरिमाणवत्त्वम् अवयवत्वमिति केचित् प्रतिपेदिरे तन्न सम्यक्, घटादौ अवच्छिन्नपरिमाणवत्त्वेन तत्रातिव्याप्तेः किन्तु द्रव्यारम्भकद्रव्यत्वमेवावयवत्वम्। यु अमिश्रणे अप्। २देहे तस्यान्त्यावयवितया द्रव्यान्तरानारम्भकत्वेन इतरद्रव्यसमवायशून्यत्वात् तथात्वम् ३हस्तादिषु देहावयवत्वात्तेषान्तथात्वम्। ते च प्राधान्येन पञ्च सुश्रुते दर्शिताः ७२ पृष्ठे अङ्गशब्दे उक्ताः। अङ्गप्रत्यङ्गानि च सूक्ष्मरूपेण गर्भे एव उत्पद्यन्ते क्रमशो विवर्द्धमानानि दृश्यन्ते यथोक्तं सुश्रुते "सर्व्वाङ्गप्रत्यङ्गानि युगवत् सम्भवन्तीत्याह धन्वन्तरिः गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्चूतफलवच्च तद्यथा चूतफले परिपक्वे केशरमांसास्थिमज्जानः प्रत्यक् दृश्यन्ते कालप्रकर्षात्, तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्। तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति एतेनैव वंशाङ्कुरोऽपि व्याख्यातः एवं गर्भस्य तारुण्ये सर्व्वेष्वङ्गेषु सत्स्वपि सौक्ष्म्यात्तदनुपलब्धिः। तान्येव कालप्रकर्षात् प्रव्यक्तानि भवन्ति"। अधिकं गर्भशब्दे वक्ष्यते। "तृतीये तु मास्यङ्गैरिन्द्रियैश्च संयुक्तो भवतीत्याहु, क्तिस्तु व्यक्ताङ्गतापरा। ४समुदायस्य एकदेशे "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च" भर्तृहरिः "क्तेनाहोरात्रावयवाः" पा॰। "क्रियाहि नामेयमत्यन्तापरिदृष्टा पूर्व्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुम्" फ॰भा॰ "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते" वाक्यप॰। एकदेशाभिप्रायेणैव नास्तिकादीनां मते परमाण्वादौ अवयवव्यवहारः तैः परमाणुपुञ्जस्यैव घटादिरूपतास्वीकारात्। न्यायादिमतसिद्धपरार्थानुमानसाधनेषु ५वाक्येषु च। ते चावयवाः पञ्च इति बहवः त्रय इत्यन्ये। यथा प्रतिज्ञाहेतूदाहरणोपनयनिगमरूपाः पञ्च, प्रतिज्ञाहेतूदाहरणरूपाः हेतूदाहरणोपनयरूपा वा मतभेदेन त्रयः। यथा पर्व्वतो वह्निमान् धूमात्, योयोधूमवान् स वह्निमान् यथा महानसम्, वह्निव्याप्यधूमो धूमवांश्चायम् तस्माद्वह्निमान्। प्रतिज्ञादीनां लक्षणानि च तत्तच्छब्दे वक्ष्यन्ते उपचारात् तत्प्रतिप्रतिपादके चिन्तामणिकृते अनुमानखण्डान्तर्गते ६ग्रन्थे। ७उपकरणमात्रे च।

**अवयविन्** त्रि॰ अवयवः कारणत्वेनास्त्यस्य इनि। अवयवजन्ये द्रव्ये। अवयवित्वं च कार्य्यद्रव्यत्वम्। तच्च नैयायिकादिभिरवयवाच्छिन्नतया उत्पद्यते इत्युरीकृतम्। तत्र कुसु॰ प्रमाणमप्युपन्यस्तम् "ननु अवयविनि किं मानं? परमाणुपुञ्जैरेवोपपत्तेः न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्षं न स्यादिति वा-